অকথিতং চ (১।৪।৫১)

সূত্রমেতদষ্টাধ্যায্যাঃ প্রথমাধ্যায়স্য চতুর্থে পাদে একপঞ্চাশত্তমম্ -
সূত্রং বৈয়াকরণসিদ্ধান্তকৌমুদ্যাঃ কারকপ্রকরণে
প্রক্রিয়াক্রমানুরোধেন আচার্যচক্রবর্তিনা ভট্টোজি-
দীক্ষিতপাদেন সমুপন্যস্তম্।

সংজ্ঞা চ পরিভাষা চ বিধির্নিয়ম এব চ।
অতিদেশোঽধিকারশ্চ ষড়্‌বিধং সূত্রলক্ষণম্॥

ইতি শ্লোকবচনাৎ ষড়্‌বিধেষু সূত্রেষু সূত্রমিদং সংজ্ঞাসূত্রম্।

দ্বিপদাত্মকমিদং সূত্রম্। অকথিতমিতি প্রথমং পদম্। 'চ' ইতি দ্বিতীয়ং পদম্। অকথিতমিত্যস্য অবিবক্ষিতমিত্যর্থঃ। 'চ' শব্দঃ কর্মসংজ্ঞাবোধকঃ।

অনির্দিষ্টম্, অকথিতম্, অসংকীর্তিতম্ ইতি ইমে অকথিতশব্দস্য পর্যায়াঃ। ন কথিতমিতি বিগ্রহে অকথিতশব্দঃ সিদ্ধঃ। ননু কেন অকথিতম্ ইতি জিজ্ঞাসায়াম্ অপাদানাদিবিশেষৈরিতি লভ্যতে। অপাদানাদিকারকঘটকান্যতমতয়া বিশেষেণ যন্ন বিবক্ষিতং কিন্তু সম্বন্ধমাত্রতয়ৈব বিবক্ষিতং তদকথিতম্। যদ্যপি অকথিতশব্দো রূঢ্যা অপ্রধানবাচী তথাপি ইহ যোগার্থো নাশ্রীয়তে। অত্র তু অকথিতশব্দস্য অবিবক্ষিতরূপোঽর্থো বোধ্যঃ। তথাহি মহাভাষ্যপ্রদীপে প্রদীপিতম্ -

"অন্যপ্রতিবচনাভ্যাং চাসংকীর্তিতবচনোঽকথিতশব্দো; ন তু অপ্রধানবাচী রূঢ়িশব্দঃ অত্রাশ্রিত ইতি দর্শিতম্" ইতি।

অত এব সূত্রস্যাস্য বৃত্তির্বিনির্মিতা দীক্ষিতপাদেন -
অপাদানাদিবিশেষৈরবিবক্ষিতং কারকং কর্মসংজ্ঞং স্যাদিতি।

ননু তথা সতি নট্যা শৃণোতীত্যত্র নটস্যাপি অকথিতত্বে বা নট্যাপি কর্মত্বং স্যাৎ, তস্যাপি ক্রিয়ান্বয়িত্বেন কারকত্বাৎ ইত্যাশঙ্কায়াং ভাষিতা ভাষ্যে ভাষ্যকৃতা পতঞ্জলিনা কারিকেয়ম্ -

দুহিযাচিরুধিপ্রচ্ছিভিক্ষিচিঞামুপযোগনিমিত্তমপূর্ববিধৌ।
ব্রুবিশাসিগুণেন চ যৎসচতে তদকীর্তিতমাচরিতং কবিনা॥ ইতি।

প্রকৃতসূত্রস্থশ্লোকবার্তিকে পচিদণ্ডিমথিমুষ্যাদয়ো ন পঠিতাঃ, তথাপি চকারেণ তেঽপি গ্রাহ্যা ইতি কৈয়টঃ।

অতঃ শাব্দিকপ্রবরেণ দীক্ষিতেন অন্যেষাং ধাতূনাং সংগৃহ্য কারিকেয়ম্ কলিতা -

দুহ্যাচ্পচ্দণ্ড্রুধিপ্রচ্ছিচিব্রূশাসুজিমথ্মুষাম্।
কর্মযুক্ স্যাদকথিতং তথা স্যান্নীহৃকৃষ্বহাম্॥ ইতি।

অতএব দুহ্যাদীনাং দ্বাদশানাং তথা নীপ্রভৃতীনাং চতুর্ণাং কর্মণা যদ্যুজ্যতে তদেবাকথিতং কর্ম ইতি পরিগণনং কর্তব্যমিত্যর্থঃ।

এষাং ক্রমেণোদাহরণানি যথা - গাং দোগ্ধি পয়ঃ, বলিং যাচতে বসুধাম্, অবিনীতং বিনয়ং যাচতে, তণ্ডুলানোদনং পচতি, গর্গান্ শতং দণ্ডয়তি, ব্রজমবরুণদ্ধি গাম্, মাণবকং পন্থানং পৃচ্ছতি, বৃক্ষমবচিনোতি ফলম্, মাণবকং ধর্মং ব্রূতে শাস্তি বা, শতং জয়তি দেবদত্তম্, সুধাং ক্ষীরনিধিং মথ্নাতি, দেবদত্তং শতং মুষ্ণাতি, গ্রামমজাং নয়তি হরতি কর্ষতি, বহতি বা, বলিং ভিক্ষতে বসুধাম্, মাণবকং ধর্মং ভাষতে, অভিধত্তে, বক্তীত্যাদিঃ।

[illegible]